"भूमिर्विशुध्यति कालात् दाहमार्ज्जनगोक्रमैः ।
लेपादुल्लेखनात् सेकाद्वेश्मसंमार्ज्जनार्च्चनात् ॥")
भोजनम् । इति मेदिनी । पे, १० ॥ (लिप्यते-ऽनेनेति ।) सुधा । इति विश्वः ॥ चुन इति भाषा ॥

लेपकः, पुं, (लिम्पतीति । लिप् + ण्वुल् ।) जाति-विशेषः । राज इति थेकर इति च भाषा । तत्पर्य्यायः । पलगण्डः २ । इत्यमरः ॥ लेपी ३ । इति शब्दरत्नावली ॥ लेप्यकृत् ४ । इति हेमचन्द्रः ॥ (लेपनकर्त्तरि, त्रि ॥)

लेपनं, क्ली, (लिप् + ल्युट् ।) लेपः । लेपा इति भाषा । यथा,—
"वैशाखस्य सिते पक्षे तृतीयाक्षयसंज्ञिता ।
तत्र मां लेपयेद्गन्धलेपनैरतिशोभितम् ॥"
इति तिथ्यादितत्त्वम् ॥

विष्णुगृहलेपनफलं यथा,—
वराह उवाच ।
"शृणु तत्त्वेन मे देवि ! लिप्यमानस्य यत् फलम् ।
सर्व्वं ते कथयिष्यामि यथा प्राप्नोति मानवः ॥
गोमयं गृह्य वै भूमे मम वेश्मोपलेपयेत् ।
न्यस्तानि तत्र यावन्ति पदानि च विलिम्पतः ॥
तावद्वर्षसहस्राणि दिव्यानि दिवि मोदते ।
यदि द्वादश वर्षाणि लिप्यते मम कर्म्मसु ॥
जायते विपुले शुद्धे धनधान्यसमाकुले ॥
दिव्यैर्नमस्कृतो देवि ! कुशद्वीपाय गच्छति ।
कुशद्वीपमनुप्राप्य सहस्रं जीवते दश ।
मद्भक्तश्चैव जायेत महिमागुणवान् शुचिः ॥
कुशद्वीपात् परिभ्रष्टो मम कर्म्मपरायणः ।
राजा वै जायते शुभ्रु सर्व्वधर्म्मेषु निष्ठितः ॥
लेपनस्य प्रभावेण मम कर्म्मपरायणः ।
भक्त्या व्यवस्थितश्चापि सर्व्वशास्त्राणि गच्छति ॥
देवि ! कारयते सर्व्वं मम चायतनानि च ॥
कारयित्वा यथान्यायं मम लोकाय गच्छति ॥
गोमयस्य तु वक्ष्यामि तच्छृणुष्व वसुन्धरे ।
गोमयन्तु समासाद्य यावल्लोकोऽनुगच्छति ॥
समीपे यदि वा दूरे गत्वानयति गोमयम् ।
यावन्ति तत्पदान्यस्य तावद्वर्षसहस्रकम् ।
गोमयानयिता चैव स्वर्गलोके महीयते ॥
एकादशसहस्राणि एकादशशतानि च ।
ततः स शाल्मले द्वीपे रमते च सदा शुतः ॥
शाल्मलात्तु परिभ्रष्टो राजा भवति धार्म्मिकः ।
मद्भक्तश्चैव जायेत सर्व्वधर्म्मविदांवरः ॥
अथ द्वादशवर्षाणि मच्चित्तः सुदृढ़व्रतः ।
वहते गोमयं शुभ्रु मम लोकाय गच्छति ॥"
इति वराहपुराणम् ॥

देवीगृहलेपनफलं यथा,—
"देव्या गृहन्तु यः शुक्र गोमयेनानुलेपयेत् ।
स्त्रियो वा यदि वा पुंसः षण्मासन्तु निरन्तरम् ।
स लभेदीप्सितान् कामान् देव्या लोकञ्च गच्छति ॥"
देवीपुराण ४२ अध्यायः ॥
(रात्रौ लेपननिषेधो यथा,—
"न रात्रौ लेपनं कुर्य्यात् शुष्कमाणं न धारयेत् ।
शुष्कमाणमुपेक्षेत प्रदेहे पीड़नं प्रति ॥"
इति मध्यखण्डे त्रयोविंशेऽध्याये शार्ङ्गधरेणोक्तम् ॥ )

लेपनः, पुं, (लिम्पत्यनेनेति । लिप् + करणे ल्युट् ।) तुरुष्कनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

लेपी [न्] पुं, (लिम्पतीति । लिप् + णिनिः ।) लेपकः । थेकर इति भाषा । इति शब्दरत्नावली ॥ लेपकर्त्तरि लेपविशिष्टे च त्रि ॥

लेप्यं, त्रि, (लिप् + ण्यत् ।) लेपनीयम् । लेप्तव्यम् । लिपधातोः कर्म्मणि यप्रत्ययेन निष्पन्नम् ॥ (यथा, भागवते । ११ । २७ । १२ ।
"शैली दारुमयी लौही लेप्या लेख्या च सैकती ।
मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता ॥")

लेप्यकृत्, पुं, (लेप्यं करोतीति । कृ + क्विप् ।) लेपकः । इति हेमचन्द्रः । ३ । ५८६ ॥

लेप्यमयी, स्त्री, (लेप्य + मयट् । ङीप् ।) काष्ठादिघटितपुत्तलिका । तत्पर्य्यायः । अञ्जलिकारिका २ । इति हेमचन्द्रः ॥

लेप्यस्त्री, स्त्री, (लेप्या स्त्री ।) सुगन्धद्रव्यलिप्ता स्त्री । इति शब्दरत्नावली ॥

लेयः, पुं, सिंहराशिः । इति ज्योतिस्तत्त्वम् ॥

लेलिहानः, पुं, (पुनःपुनरतिशयेन वा लेढ़ीति । लिह् + यङ् + शानच् ।) शिवः । इति शब्दरत्नावली ॥ सर्पः । इति हेमचन्द्रः ॥ पुनःपुनर्लेहनकर्त्तरि, त्रि ॥ (यथा, महाभारते । १ । २३३ । ५ ।
"सप्तजिह्वाननः क्रूरो लेलिहानो विसर्पति ॥")

लेलिहाना, स्त्री, (लेलिहान + स्त्रियां टाप् ।) मुद्राविशेषः । यथा,—
"वक्त्रं विस्तारितं कृत्वाप्यधो जिह्वाञ्च चालयेत् ।
पार्श्वस्थं मुष्टियुगलं लेलिहानेति कीर्त्तिता ॥"
एषा ताराराधने । अन्या लेलिहाना वक्तव्या ।
"योनिर्म्मायाधरः सेन्दुर्वधूः कूर्चं क्रमादिदुः ॥
बीजानि चोच्चरन् मन्त्री मुद्रावन्धनमाचरेत् ।
तर्ज्जनीमध्यमानामाः समं कुर्य्यादधोमुखम् ॥
अनामायां क्षिपेद्वृद्धां ऋज्वीं कृत्वा कनिष्ठिकाम् ।
लेलिहानाख्यमुद्रेयं जीवन्यासे प्रकीर्त्तिता ॥"
इति तन्त्रसारः ॥

लेशः, पुं, (लिश् + घञ् ।) कणा । इत्यमरः ॥ (यथा, महाभारते । १२ । ५८ । २४ ।
"एष ते राजधर्म्माणां लेशः समनुवर्णितः ॥")

लेष्टुः, पुं, (लिश्यते इति । लिश् + बाहुलकात् तुन् ।) लोष्टम् । इत्यमरः ॥ (यथा, महाभारते । १३ । ३४ । २६ ।
"अथ यो ब्राह्मणान् क्रुष्टः पराभवति सोऽचिरात् ।
यथा महार्णवे क्षिप्त आमलेष्टुर्व्विनश्यति ॥")

लेष्टुघ्नः, पुं, (लेष्टुं हन्तीति । हन् + टक् ।) लेष्टुभेदनः । इति शब्दरत्नावली ॥

लेष्टुभेदनः, पुं, (लेष्टुं भिनत्तीति । भिद् + ल्युट् ।) लोष्टभञ्जसाधनमुद्गरः । मइ इति ख्यातः । इति केचित् । इति भरतः ॥ तत्पर्य्यायः । कोटिशः २ । इत्यमरः ॥ कोटीशः ३ । इति रत्नकोषः ॥ लेष्टुघ्नः ४ लेष्टुभेदी ५ चूर्णदण्डः ६ । इति शब्दरत्नावली ॥

लेसिकः, पुं, हस्त्यारोहकः । तत्पर्य्यायः । कटिरोहकः २ । इति शब्दमाला ॥

लेहः, पुं, (लेहनमिति । लिह् + घञ् ।) आहारः । भक्षणम् । इति हेमचन्द्रः ॥ तत्पर्य्यायः । स्वादनम् २ रसनम् ३ स्वदनम् ४ स्वदिः ५ । इति राजनिर्घण्टः ॥ (यथा, बृहत्संहितायाम् । ५ । ४३ ।
"सव्यापसव्यलेहग्रसननिरोधावमर्द्दनारोहाः ।
आघ्रातं मध्यतमस्तमोऽन्त्य इति ते दश ग्रासाः ॥"
कर्म्मणि घञ् । रसः । यथा, सुश्रुते । १ । ४४ ।
"पचेल्लेहं सिता चौद्रं पलार्द्धकुड़वान्वितम् ॥"
लेढ़ीति । लिह् + पचाद्यच् । लेहनकर्त्तरि, त्रि ।
यथा, भट्टिः । ६ । ८२ ।
"इच्छोऽहं मधुनो लेहैर्द्धविद्यमैर्यथा गिरिः ॥"
अवलेहः । तत्पर्य्यायो यथा,—
"क्वाथस्य स्यात् पुनः पाकात् घनत्वं सा रसक्रिया ।
सोऽवलेहश्च लेहः स्यात्तन्मात्रा स्यात् पलोन्मिता ॥
सिता चतुर्गुणा कार्य्या चूर्णाच्च द्विगुणो गुड़ः ।
द्रवं चतुर्गुणं दद्यादिति सर्व्वत्र निश्चयः ॥"
इति मध्यखण्डेऽष्टमेऽध्याये शार्ङ्गधरेणोक्तम् ॥")

लेहनं, क्ली (लिह् + ल्युट् ।) जिह्वया रसग्रहणम् । चाटन इति भाषा । तत्पर्य्यायः । जिह्वास्वादः २ । इति हेमचन्द्रः ॥

लेहिनः, पुं, (लिह् + बाहुलकात् इनन् ।) टङ्कणम् । इति हेमचन्द्रः ॥

लेह्यं, क्ली, (लिह् + ण्यत् ।) अन्नतम् । इति शब्दमाला ॥ लेहनीये, त्रि ॥ (यथा, कथासरित्सागरे । ४५ । २३० ।
"ततस्ते नानाविधं भक्ष्यभोज्यलेह्यादि षड्रसम् ।
दिव्यमन्नं बुभुजिरे पपुः पानमथोत्तमम् ॥"
आहारविशेषो यथा,—
"आहारं षड्विधञ्चूष्यं पेयं लेह्यन्तथैव च ।
भोज्यं भक्ष्यन्तथा चर्व्व्यं गुरु विद्याद्यथोत्तरम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

लैङ्गं, क्ली, (लिङ्गमधिकृत्य कृतो ग्रन्थ इति । लिङ्गस्येदमिति वा । लिङ्ग + अण् ।) लिङ्गपुराणम् । यथा,—
"मात्स्यं कौर्म्मं तथा लैङ्गं शैवं स्कान्दन्तथैव च ॥"
इत्यादि पाद्मोत्तरखण्डे ३४ अध्यायः ॥
(अस्य विवरणादिकं पुराणशब्दे द्रष्टव्यम् ॥ )